Register Number:

Date:

**ST. JOSEPH'S UNIVERSITY BANGALORE-27**

**B.SC, B.A, B.COM & BBA - III SEMESTER**

**SEMESTER EXAMINATION: DECEMBER 2023**

**SA 322 – SAMSKRIT**

**Time- 2hrs** **Max Marks-60**

**I. समुचितम् उत्तरम् चिनुत।** **10×1=10**

अ) नीलकण्ठदीक्षितः कीदृशं काव्यं अरचयत्?

१. गद्यात्मकम् २. पदलालित्यम् ३. रसात्मकम् ४. विडम्बनात्मकम्

आ) नीलकण्ठदीक्षितः कुत्र जन्मं प्राप्तवान्?

१. आड्यापालम् २. मधुरै ३. काञ्ची ४. न कुत्रापि

इ) मधुरै राजा कः आसीत्?

१. इद्रः २. महेश्वरः ३. दीक्षितः ४. तिरुमलनायकः

ई) कतिविधं मङ्गलम्?

१. द्विविधम् २. त्रिविधम् ३. चतुर्विधम् ४. षड्विधम्

उ) भूमेः स्वर्गस्य च सेतुभूता का?

१. अर्चकः २. देवः ३. श्रुतिः ४. नारदः

ऊ) नीलकण्ठविजयजम्पूकाव्ये कति आश्वासाः सन्ति?

१. 5 २. 2 ३. 6 ४. 8

ऋ) महेन्द्रस्य स्थानं किम्?

१. अमरावती  २. भूलोकः  ३. प्रासादः  ४. पण्यवीथिः

ॠ) त्रिपुण्ड्ररेखा कस्य ललाटे आसीत्?

१. नारदस्य  २. दूर्वासस्य  ३. इन्द्रस्य  ४. शिवस्य

ऌ) भवानीपतेः स्थाने के लभ्यन्ते?

१. देवाः  २. अङ्गदेवताः  ३. गणाः  ४. प्रेताः

ए) अनसूयायाः पुत्रः कः?

१. दूर्वासः  २. बलिः  ३. शुक्राचार्यः  ४. तारकासुरः

ऐ) श्रुतिपाठशुष्कवदनाः कुत्र लभ्यन्ते?

१. स्वर्गे  २. वेधसे  ३. अमरावतीनगरे  ४. इन्द्रलोके

**II. श्लोकयोः तात्पर्यं लिखत। 2×5=10**

2) लीढालीढपुराणसूक्तिशकलावष्टम्भसंभावना-
पर्यस्तश्रुतिसेतुभिः कतिपयैर्नीते कलौ सान्द्रताम्।
श्रीकण्ठोऽवततार यस्य वपुषा कल्यात्मनेवाच्युतः
श्रीमानप्पयदीक्षितः स जयति श्रीकण्ठविद्यागुरुः॥

3) लभ्यन्ते श्रुतिपाठशुष्कवदना विप्राः पदे वेधसो
वैकुण्ठे तुलसीवनानि सुलभान्यार्द्राणि शुष्काणि च।
प्रेता भूतगणाश्च सन्ति शतशः स्थाने भवानीपतेः
रन्तान्यप्सरसः सुधेति तु पदे यस्यैव लब्धुं क्षमम्॥

4) अस्ति स्वादयितुं सुधास्ति वसितुं वासो नभश्चारिणां
धर्तुं सन्ति च भूषणानि शतशो न त्वस्ति धीर्जीवितुम्।
येनान्यानुपजीव्यसर्पविभवे कर्मैकलभ्ये पदेऽ
प्यायस्यन्ति वृथैव सेवक इति स्वामीति दुर्मेधसः॥

**III. सविस्तरं लिखत। 2×10=20**

5) इन्द्रस्य वर्णनं कुरुत।

6) गद्य-पद्य-चम्पूविषयं अधिकृत्य लिखत।

7) नीलकण्ठदीक्षितस्य देश-काल-कृतिमधिकृत्य लिखत।

**IV. लघुटिप्पणीं लिखत।** **2×5=10**

8) संहतिः कार्यसाधिका।

ओ) यद्भावं तत् भवति।

औ) पिण्डे पिण्डे मतिः भिन्ना।

**V. अनुच्छेदं पठित्वा उत्तरत।**

एकदा कश्चित् नरः आखेटाय वनं अगच्छत्। सः सर्वं दिनं वने अभ्रमत्, किन्तु कम् अपि पशुं न अपश्यत्। सायंकाले यदा स्वगृहं प्रति आगच्छति स्म, तदा सः एकां पुत्रसहितां हरिणीम् अपश्यत्। सः नरः अश्वारढः तस्याः अनुसरणम् अकरोत् किन्तु सा मृगी कुत्रचित् अदृश्या अभवत्। ततः सः तस्याः शावकं गृहीत्वा अश्वस्य पृष्ठे बद्धवान्। पुनः अश्वम् आरुह्य सः नरः किञ्चित् दूरं गत्वा अपश्यत् यत् पुत्रस्नेहेन व्याकुला सा मृगी अपि पुत्रम् अनुसरति स्म। सः अचिन्तयत् एषा हरिणी स्वप्राणमोहं त्यक्त्वा पुत्रं रक्षितु इच्छति, अहो एतां निराशां न करिष्यामि इति विचार्य सः मृगीशावकं अमुञ्चत्। हरिणी प्रसन्ना अभवत्।

9) सः नरः कम् अमुञ्चत्? **5×2=10**

अं. अश्वम् आरुह्य सः नरः किञ्चिद् दूरं गत्वा किम् अपश्यत्?

अः. नरः किं गृहीत्वा अश्वस्य पृष्ठे बद्धवान्?

क. सः नरः कथं तस्याः अनुसरणम् अकरोत्?

ख. अस्य गद्यांशस्य शीर्षकं लिखत?